CC0. In Public Domain, Digitizagtion by eGangotri

५.२

गीतगोविन्द काव्यम्

...न्थालय
वाराणसी-५
64149

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चेन्नपुर्यां
वाविल्ल मुद्रणालये
मुद्रितम् १९५६.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ श्रीः ॥

जयदेवकविविरचितम्

॥ गीतगोविन्दकाव्यम् ॥

चेन्नपुर्याम्

वाविळ्ल रामस्वामिशास्त्रुलु अण्ड् सन्स्

इत्येतैः प्रकटितम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चेन्नपुर्याम्
वाविळ्ळ मुद्रणालये
मुद्रितम् १९५६.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ श्रीः ॥

श्रीजयदेवकविविरचितं

॥ गीतगोविन्दकाव्यम् ॥

॥ प्रथमस्सर्गः ॥

श्लो॥ मेघैर्मेदुरमम्बरं वनभुवश्श्यामास्तमालद्रुमैः
नक्तं भीरुरयं त्वमेव तदिमं राधे! गृहं प्रापय।
इत्थं नन्दनिदेशतश्चकितयोः प्रत्यध्वकुंजद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेळयः ॥

श्लो॥ वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्ती ।
श्रीवासुदेवरतिकेळिकथासमेत-
मेतं करोति जयदेवकविः प्रबन्धम् ॥ २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ यदि हरिस्मरणे सरसं मनो
यदि विलासकलासु कुतूहलम् ।
मधुरकोमलकान्तपदावलीं
शृणु तदा जयदेवसरस्वतीम् ॥ ३

श्लो ॥ वाचः पल्लवयत्युमापति-
धरस्संदर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः
श्लाघ्यो दुरूहद्रुतेः ।
शृंगारोत्तरसत्प्रमेय-
रचनैराचार्यगोवर्धन-
स्पर्धी कोऽपि न विश्रुतश्श्रुति-
धरो धोयी कविक्ष्मापतिः ॥ ४

———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टपदी १.

॥ मालवरागेण रूपकतालेन गीयते ॥

प्रळयपयोधिजले धृतवानसि वेदं
विहितवहित्रचरित्रमखेदम् ।
केशव ! धृतमीनशरीर !
जय जगदीश ! हरे ॥ ध्रुवपदम् ॥ १

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे
धरणिधरणकिणचक्रगरिष्ठे ।
केशव ! धृतकच्छपरूप !
जय जगदीश ! हरे ! ॥ ध्रुव ॥ २

वसति दशनशिखरे धरणी तव लग्ना
शशिनि कळङ्ककलेव निमग्ना ।
केशव ! धृतसूकररूप !
जय जगदीश ! हरे ! ॥ ध्रुव ॥ ३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तव करकमलवरे नखमद्भुतशृङ्गं
दलितहिरण्यकशिपुवरभृङ्गम् ।
केशव ! धृतनरहरिरूप
जय जगदीश ! हरे ! ॥ ध्रुव ॥ ४

छलयसि विक्रमणे बलिमद्भुतवामन !
पदनखनीरजनितजनपावन ।
केशव ! धृतवामनरूप !
जय जगदीश ! हरे ! ॥ ध्रुव ॥ ५

क्षत्रियरुधिरमये जगदपगतपापं
स्नपयसि पयसि शमितभवतापम् ।
केशव ! धृतभृगुपतिरूप !
जय जगदीश ! हरे ! ॥ ध्रुव ॥ ६

वितरसि दिक्षु रणे दिक्पतिकमनीयं
दशमुखमौलिबलिं रमणीयम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

केशव ! धृतरामशरीर !
जय जगदीश ! हरे ! ॥ ध्रुव ॥ ७

वहसि वपुषि विशदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभम् ।
केशव ! धृतहलधररूप !
जय जगदीश ! हरे ! ॥ ध्रुव ॥ ८

निन्दसि यज्ञविधेरहह श्रुतिजातं
सदयहृदयदर्शितपशुघातम् ।
केशव ! धृतबुद्धशरीर !
जय जगदीश ! हरे ! ॥ ध्रुव ॥ ९

म्लेच्छनिवहनिधने कलयसि करवालं
धूमकेतुमिव किमपि करालम् ।
केशव ! धृतकल्किशरीर !
जय जगदीश ! हरे ! ॥ ध्रुव ॥ १०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवकवेरिदमुदितमुदारं
शृणु शुभदं सुखदं भवसारम् ।
केशव ! धृतदशविधरूप !
जय जगदीश ! हरे ! ॥ ध्रुव ॥ ११

श्लो ॥ वेदानुद्धरते जगन्निवहते
भूगोलमुद्बिभ्रते
दैत्यान्दारयते बलिं छलयते
क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते
कारुण्यमातन्वते
म्लेच्छान्मूर्च्छयते दशाकृतिकृते
कृष्णाय तुभ्यं नमः ॥ ५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टपदी २.

॥ गुर्जरीरागनिस्सारताळाभ्यां गीयते ॥

श्रितकमलाकुचमण्डल ! धृतकुण्डल ! ए।
कलितललितवनमाल ! जयजय देव !
हरे ! ध्रुवम् ॥ १

दिनमणिमण्डलमण्डन ! भवखण्डन ! ए।
मुनिजनमानसहंस ! जयजय देव ! हरे ! २

कालियविषधरगञ्जन ! जनरञ्जन ! ए।
यदुकुलनलिनदिनेश ! जयजय देव ! हरे ! ३

मधुमुरनरकविनाशन ! गरुडासन ! ए।
सुरकुलकेळिनिदान ! जयजय ! देव ! हरे ! ४

अमलकमलदळलोचन ! भवमोचन ! ए।
त्रिभुवनभवननिदान ! जयजय देव हरे ! ५

जनकसुताकुचभूषण ! जितदूषण ! ए।
समरशमितदशकण्ठ ! जयजय ! देव हरे ! ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिनवजलधरसुन्दर ! धृतमन्दर ! ए ।
श्रीमुखचन्द्रचकोर ! जयजय देव ! हरे ! ७

तव चरणे प्रणता वयमिति भावय ! ए ।
कुरु कुशलं प्रणतेषु जयजय देव ! हरे ! ८

श्रीजयदेवकवेरिदं कुरुते मुदं, ए ।
मङ्गळमुज्ज्वलगीतं जयजय देव ! हरे ! ९

श्लो ॥ पद्मापयोधरतटीपरिरम्भलग्न-
काश्मीरमुद्रितमुरो मधुसूदनस्य ।
व्यक्तानुरागमिव खेलदनङ्गखेद-
स्वेदाम्बुपूरमनुपूरयतु प्रियं वः ॥ ६

श्लो ॥ वसन्ते वासन्तीकुसुमसुकुमारैरवयवै-
र्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम् ।
अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
वलद्बाधां राधां सरसमिदमूचे सहचरी ॥ ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टपदी ३.

॥ वसन्तरागयतिताळाभ्यां गीयते ॥

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे ।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे ॥ १
विहरति हरिरिह सरसवसन्ते नृत्यति
युवतिजनेन समं सखि ! विरहिजनस्य दुरन्ते
ध्रुवम् ॥ २
उन्मदमदनमनोरथपथिकवधूजनजनितविलापे ।
अलिकुलसङ्कुलकुसुमसमूहनिराकुलवकुलकलापे॥ ३
मृगमदसौरभरभसवशंवदनवदलमालतमाले ।
युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ॥
मदनमहीपतिकनकदण्डरुचिकेसरकुसुमविकासे ।
मिळितशिलीमुखपाटलपटलकृतस्मरतूणविलासे ॥५
विगळितलज्जितजगदवलोकनतरुणकरुणकृतहासे ।
विरहिनिकृन्तनकुन्तमुखाकृतिकेतकदन्तुरिताशे ॥६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

माधविकापरिमळललिते नवमालतिजातिसुगन्धौ ।
मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ ॥
स्फुरदतिमुक्तलतापरिरम्भणमुकुळितपुलकितचूते ।
वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥ ८
श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारम् ।
सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम् ॥ ९

श्लो ॥ दरविदळितमल्लीवल्लिचञ्चत्पराग-
प्रकटितपटवासैर्वासयन्काननानि ।
इह हि दहति चेतः केतकीगन्धबन्धुः
प्रसरदसमबाणप्राणवद्गन्धवाहः ॥ ८

श्लो ॥ उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलरवैरुद्गीर्णकर्णज्वराः ।
नीयन्ते पथिकैः कथं कथमपि ध्यानानुधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥ ९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ अनेकनारीपरिरम्भसंभ्रम-
स्फुरन्मनोहारिविलासलालसम् ।
मुरारिमारादुपदर्शयन्त्यसौ
सखीसमक्षं पुनराह राधिकाम् ॥ १०

अष्टपदी ४.

॥ रामक्रियारागयतितालाभ्यां गीयते ॥

चन्दनचर्चितनीलकळेबरपीतवसनवनमाली ।
केळिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली ॥

हरिरिह मुग्धवधूनिकरे
विलासिनि विलसति केळिपरे ॥ ध्रुवम् ॥ १

पीनपयोधरभारभरेण हरिं परिरभ्य सरागम् ।
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम् ॥
हरि ... ... केळिपरे ॥ २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काऽपि विलासविलोलविलोचनखेलनजनितमनोजम्।
ध्यायतिमुग्धवधूरधिकंमधुसूदनवदनसरोजम् ॥
हरि ... ... केलिपरे ॥ ३

काऽपि कपोलतले मिलिता लपितुं कमपि श्रुतिमूले ।
काऽपि चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले ॥
हरि ... ... केलिपरे ॥ ४

केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले ।
मञ्जुलवञ्जुलकुञ्जगतं विचकर्ष करेण दुकूले ॥
हरि ... ... केलिपरे ॥ ५

करतलताळतरळवलयावलिकलितकलस्वनवंशे ।
रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे ॥
हरि ... ... केलिपरे ॥ ६

श्लिष्यति कामपि चुम्बति
कामपि रमयति कामपि रामाम् ।
पश्यति सस्मितचारुतरामपरामनुगच्छति वामाम् ॥
हरि ... ... केलिपरे ॥ ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यम् ।
वृन्दावनविपिने ललितं वितनोतु शुभानि यशस्यम् ॥
हरि ... ... केलिपरे ॥ ८

श्लो ॥ विश्वेषामनुरञ्जनेन
जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलै-
रुपनयन्नङ्गैरनङ्गोत्सवम् ।
स्वच्छन्दं व्रजसुन्दरीभि-
रभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्तिमा
निव मधौ मुग्धो हरिः क्रीडति ॥ ११

श्लो ॥ नित्योत्सङ्गवसद्भुजङ्ग-
कवलक्लेशादिवेशाचलं
प्रालेयप्लवनेच्छयाऽनु-
सरति श्रीखण्डशैलानिलः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किञ्च स्निग्धरसालमौळि-
मुकुलान्यालोक्य हर्षोदया-
दुन्मीलन्ति कुहूःकुहू-
रिति कलोत्तालाः पिकानां गिरः ॥१२

श्लो ॥ रासोल्लासभरेण विभ्रम-
भृतामाभीरवामभ्रुवा-
मभ्यर्णं परिरभ्य निर्भर-
मुरः प्रेमान्धया राधया ।
साधु त्वद्वदनं सुधामय-
मिति व्याहृत्य गीतस्तुति-
व्याजादुत्कटचुम्बितास्मित-
मनोहारी हरिः पातु वः ॥ १३

इति श्रीजयदेवकृतौ गीतगोविन्दे सामोद-
दामोदरो नाम प्रथमस्सर्गः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ द्वितीयः सर्गः ॥

॥ अक्लेशकेशवः ॥

श्लो ॥ विहरति वने राधा
साधारणप्रणये हरौ
विगलितनिजोत्कर्षा-
दीर्ष्यावशेन गताऽन्यतः ।
क्वचिदपि लताकुञ्जे
गुञ्जन्मधुव्रतमण्डली-
मुखरशिखरे लीना
दीनाऽप्युवाच रहस्सखीम् ॥ १४

अष्टपदी ५.

॥ गुर्जरीरागेण यतितालेन च गीयते ॥

सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशम् ।
चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रासे हरिमिह विहितविलासं
स्मरति मनो मम कृतपरिहासम् ॥ ध्रुवपदम् ॥ १

चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम् ।
प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेषम् ॥
रासे ... ... हासम् ॥ २

गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभम् ।
बन्धुजीवमधुराधरपल्लवकलितदरस्मितशोभम् ॥
रासे ... ... हासम् ॥ ३

विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रम् ।
करचरणोरसिमणिगणभूषणकिरणविभिन्नतमिस्रम् ॥
रासे ... ... हासम् ॥ ४

जलदपटलचलदिन्दुविनिन्दकचन्दनबिन्दुललाटम् ।
पीनपयोधरपरिसरमर्दननिर्दयहृदयकवाटम् ॥
रासे ... ... हासम् ॥ ५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम् ।
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम् ।।
रासे ... ... हासम् ।। ६

विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तम् ।
मामपि किमपितरलतरङ्गदनङ्गदृशामनसा रमयन्तम् ।।
रासे ... ... हासम् ।। ७

श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम् ।
हरिचरणस्मरणं प्रतिसम्प्रतिपुण्यवतामनुरूपम् ।।
रासे ... ... हासम् ।। ८

श्लो।। गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते
वहति च परीतोषं दोषं विमुञ्चति दूरतः ।
युवतिषु वलत्तृष्णे कृष्णे विहारिणि मां विना
पुनरपि मनो वामं कामं करोति करोमि किम् ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टपदी ६.

॥ मालवगौडरागेण एकतालीतालेनच ॥

निभृतनिकुञ्जगृहं गतया निशि रहसि निलीयवसन्तं
चकितविलोकितसकलदिशा रतिरभसभरेण हसन्तम्
सखि ! हे केशिमथनमुदारम् ॥
रमय मयासह मदनमनोरथभावितया सविकारम् ॥
ध्रुवपदम् ॥ १

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलम् ।
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम्॥
सखि ... ... सविकारम् ॥ २

किसलयशयननिवेशितया चिरमुरसि ममैव शयानम्।
कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम् ॥
सखि ... ... सविकारम् ॥ ३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अलसनिमीलितलोचनया पुलकावलिललितकपोलम् ।
श्रमजलसकलकलेबरया वरमदनमदादतिलोलम् ॥
सखि ... ... सविचारम् ॥ ४

कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारम् ।
श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम् ॥
सखि ... ... सविचारम् ॥ ५

चरणरणितमणिनूपुरया परिपूरितसुरतवितानम् ।
मुखरविशृङ्खलमेखलयासकचग्रहचुम्बनदानम् ॥
सखि ... ... सविचारम् ॥ ६

रतिसुखसमयरसालसया दरमुकुलितनयनसरोजम् ।
निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम् ॥
सखि ... ... सविचारम् ॥ ७

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम् ।
सुखमुत्कंठितगोपवधूकथितं वितनोतु सलीलम् ॥
सखि ... ... सविचारम् ॥ ८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो॥ हस्तस्रस्तविलासवंश
मनृजुभ्रूवल्लिमद्बल्लवी
बृन्दोत्सारिदृगन्तवीक्षित
मतिस्वेदार्द्रगण्डस्थलम् ।
मामुद्वीक्ष्य विलज्जितं
स्मितसुधामुग्धाननं कानने
गोविन्दं व्रजसुन्दरीगण
वृतं पश्यामि हृष्यामि च ॥ १६

श्लो॥ दुरालोकस्तोकस्तवकनवकाशोकलतिका
विकासः कासारोपवनपवनोऽपि व्यथयति ।
अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुळ-
प्रसूतिश्चूतानां सखि ! शिखरिणीयं सुखयति ॥

श्लो॥ साकूतस्मितमाकुलाकुल
गळद्धम्मिल्लमुल्लासित
भ्रूवल्लीकमळीकदर्शितभुजा
मूलोर्ध्वहस्तस्तनम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गोपीनां निभृतं निरीक्ष्य
गमिताकांक्षश्चिरं चिन्तय-
न्नन्तर्मुग्धमनोहरं
हरतु वः क्लेशं नवः केशवः ॥ १८

इति श्रीजयदेवकृतौ गीतगोविन्दे अक्लेश
केशवो नाम द्वितीयस्सर्गः ॥

॥ तृतीयः सर्गः ॥

श्लो ॥ कंसारिरपि संसारवासनाबन्धशृङ्खलाम् ।
राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥

श्लो ॥ इतस्ततस्तामनुसृत्य राधिका-
मनङ्गबाणव्रणखिन्नमानसः ।
कृतानुतापस्स कलिन्दनन्दिनी
तटान्तपुञ्जे विषसाद माधवः ॥ २०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टपदी ७.

॥ घूर्जरीराग यतिताळाभ्यां ॥

मामियं चलिता विलोक्य वृतं वधूनिचयेन
सापराधतया मयाऽपि न वारिताऽतिभयेन
हरिहरि ! हत,दरतया
सा गता कुपितेव ॥ ध्रुवम् ॥ १

किं करिष्यति किं वदिष्यति सा चिरं विरहेण ।
किं धनेन जनेन किं मम जीवितेन गृहेण ॥
हरि ... ... कुपितेव ॥ २

चिन्तयामि तदाननं कुटिलभ्रु कोपभरेण ।
शोणपद्ममिवोपरिभ्रमताऽऽकुलं भ्रमरेण ॥
हरि ... ... कुपितेव ॥ ३

तामहं हृदि सङ्गतामनिशं भृशं रमयामि ।
किं वनेऽनुसरामि तामिह किं वृथा विलपामि ॥
हरि ... ... कुपितेव ॥ ४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तन्वि ! खिन्नमसूयया हृदयं तवाकलयामि ।
तन्न वेद्मि कुतो गताऽसि नतेन तेऽनुनयामि ॥
हरि ... ... कुपितेव ॥ ५

दृश्यसे पुरतो गतागतमेव मे विदधासि ।
किं पुरेव ससम्भ्रमं परिरम्भणं न ददासि ॥
हरि ... ... कुपितेव ॥ ६

क्षम्यतामपरं कदापि तवेदृशं न करोमि ।
देहि सुंदरि ! दर्शनं मम मन्मथेन दुनोमि ॥
हरि ... ... कुपितेव ॥ ७

वर्णितं जयदेवकेन हरेरिदं प्रवणेन ।
किंदुबिल्वसमुद्रसंभवरोहिणिरमणेन ॥
हरि ... ... कुपितेव ॥ ८

श्लो॥ हृदि बिसलताहारो नायं भुजङ्गमनायकः
कुवलयदळश्रेणी कण्ठे न सा गरळद्युतिः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहरसि हरभ्रांत्या ऽनङ्ग! क्रुधा किमु धावसि?॥

श्लो॥ पाणौमाकुरुचूतसायकममुं
माचापमारोपय
क्रीडानिर्जितविश्व! मूर्छितजना
घातेन किंपौरुषम्?
तस्या एव मृगीदृशो मनसिज
प्रेङ्खत्कटाक्षाशुग
श्रेणीजर्जरितं मनागपि मनो
नाद्यापि सन्धुक्षते॥ २२

श्लो॥ भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि
बाणा गुणश्रवणपाळिरिति स्मरेण।
तस्यामनङ्गजयजङ्गमदेवताया-
मस्त्राणि निर्जितजगन्ति किमर्पितानि?॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो॥ भ्रूचापे निहितः कटाक्षविशिखो
निर्मातु मर्मव्यथां
श्यामात्मा कुटिलः करोतु कबरी
भारोऽपिमारोद्यमम्।
मोहन्तावदयश्च तन्वि! तनुतां
बिम्बाधरो रागवान्
सद्वृत्तः स्तनमण्डलस्तव कथं
प्राणैर्ममक्रीडति ॥ २४

श्लो॥ तानि स्पर्शसुखानि तेच तरळाः
स्निग्धा दृशो विभ्रमाः
तद्वक्त्राम्बुजसौरभं स च सुधा
स्यन्दी गिरां वक्रिमा।
सा बिम्बाधरमाधुरीति विषया
सङ्गेऽपि चेन्मानसं
तस्यां लग्नसमाधि हन्त! विरह
व्याधिः कथं वर्धते? ॥ २५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो॥ तिर्यक्कण्ठविलोलमौळितरळो
त्तंसस्य वंशोच्चर-
द्गीतिस्थानकृतावधानललना
लक्षैर्न संलक्षिताः।
सम्मुग्धेमधुसूदनस्य मधुरे
राधामुखेन्दौ सुधा-
सारे कन्दळिताश्चिरं ददतु नः
क्षेमं कटाक्षोर्मयः॥ २६

इति श्री जयदेवकृतौ गीतगोविन्दे
मुग्धमधुसूदनो नाम तृतीयस्सर्गः॥

॥ चतुर्थः सर्गः॥

श्लो॥ यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम्।
प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टपदी ८.

॥ कर्णाटकरागेक ताळीताळाभ्यां गीयते ॥

निन्दति चन्दनमिन्दुकिरण
मनु विन्दति खेदमधीरं ।
व्यालनिलयमिळनेन गरळं
मिव कलयति मलयसमीरम् ॥
माधव मनसिजविशिखभयादिव
भावनया त्वयि लीना ॥
सा विरहे तव दीना । ॥ ध्रुवम् ॥ १

अविरळनिपतितमदनशरादिव
भवदवनाय विशालम् ।
स्वहृदयमर्मणि वर्म करोति
सजलनळिनीदळजालम् ॥
सा विरहे तव दीना । ॥ ध्रुवम् ॥ २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुसुमविशिखशरतल्पमनल्प
विलासकलाकमनीयम् ।
व्रतमिव तव परिरम्भसुखाय
करोति कुसुमशयनीयम् ॥
सा विरहे तव दीना । ॥ ध्रुवम् ॥ ३

वहतिच वलितविलोचनजलधर
माननकमलमुदारम् ।
विधुमिव विकटविधुन्तुददन्त
दळनगळितामृतधारम् ॥
सा विरहे तव दीना । ॥ ध्रुवम् ॥ ४

विलिखति रहसि कुरङ्गमदेव
भवन्तमसमशरभूतम् ।
प्रणमति मकरमधो विनिधाय
करे च शरं नवचूतम् ॥
सा विरहे तव दीना । ॥ ध्रुवम् ॥ ५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ध्यानलयेन पुरः परिकल्प्य
भवन्तमतीव दुरापम् ।
विलपति हसति विषीदति रोदिति
चञ्चति मुञ्चति तापम् ॥
सा विरहे तव दीना । ॥ ध्रुवम् ॥ ६

प्रतिपदमिदमपि निगदति माधव !
तव चरणे पतिताऽहं ।
त्वयि विमुखे मयि सपदि सुधानिधि
रपि तनुते तनुदाहम् ॥
सा विरहे तव दीना । ॥ ध्रुवम् ॥ ७

श्रीजयदेवभणितमिदमधिकं
यदि मनसा नटनीयम् ।
हरिविरहाकुलवल्लवयुवति
सखीवचनं पठनीयम् ॥
सा विरहे तव दीना । ॥ ध्रुवम् ॥ ८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ आवासो विपिनायते प्रियसखी
मालाऽपि जालायते
तापोऽपि श्वसितेन दावदहन
ज्वालाकलापायते ।
साऽपि त्वद्विरहेण हन्त !
हरिणीरूपायते हा ! कथं
कन्दर्पोऽपि यमायते विरचयन्
शार्दूलविक्रीडितम् ॥ २८

अष्टपदी ९.

॥ देशाख्यरागैकताळाभ्यां गीयते ॥

स्तनविनिहितमपि हारमुदारं
सा मनुते कृशतनुरिव भारम् ।
राधिका तव विरहे केशव ! ॥ ध्रुवम् ॥ १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सरसमसृणमपि मलयजपङ्कं
    पश्यति विषमिव वपुषि सशङ्कम् ।
राधिका ... केशव ॥ ध्रुवम् ॥ २

श्वसितपवनमनुपमपरिणाहं
    मदनदहनमिव वहति सदाहम् ।
राधिका ... केशव ॥ ध्रुवम् ॥ ३

दिशि दिशि किरति सजलकणजालम् ।
नयननलिनमिव विगलितनालम् ॥
राधिका ... केशव ॥ ध्रुवम् ॥ ४

नयनविषयमपि किसलयतल्पम् ।
कलयति विहितहुताशनकल्पम् ॥
राधिका ... केशव ॥ ध्रुवम् ॥ ५

त्यजति न पाणितलेन कपोलम् ।
बालशशिनमिव सायमलोलम् ॥
राधिका ... केशव ॥ ध्रुवम् ॥ ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हरिरिति हरिरिति जपति सकामम् ।
विरहविहितमरणेव निकामम् ॥
राधिका ... केशव ॥ ध्रुवम् ॥ ७

श्रीजयदेवभणितमिति गीतम् ।
सुखयतु केशवपदमुपनीतम् ॥
राधिका ... केशव ॥ ध्रुवम् ॥ ८

श्लो ॥ सा रोमाञ्चति सीत्करोति विलप
त्युत्कम्पते ताम्यति
ध्यायत्युद्भ्रमति प्रमीलति पत
त्युद्यातिमूर्च्छत्यपि ।
[1]एतावत्यतनुज्वरे वरतनु
र्जीवेन्न किं ते रसात्
स्वर्वैद्यप्रतिम ! प्रसीदसि यदि
त्यक्तोऽ[2]न्यथाहस्तकः ॥ २९

1 एतादृश्यतनु. 2. थाऽस्यन्तकः.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ स्मरातुरां दैवतवैद्यहृद्य !

त्वदङ्गसङ्गामृतमात्रसाध्याम् ।

विमुक्तबाधां कुरुषे न राधां

उपेन्द्र ! वज्राधिकदारुणोऽसि ॥ ३०

श्लो ॥ कन्दर्पज्वरसं[1]ज्वराकुलतनो-

राश्चर्यमस्याश्चिरं

चेतश्चन्दनचन्द्रमः कमलिनी-

चिन्तासु सन्ताम्यति ।

[2]किन्तु क्लान्तिवशेन शीतलतरं

त्वामेकमेव क्षणं

ध्यायन्ती रहसि स्थिता कथमपि

क्षीणा क्षणं प्राणिति ॥ ३१

---

1. ज्वरातुरतनो. 2. किंतू क्लान्तिवशेन.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ क्षणमपि विरहः पुरा न सेहे
नयननिमीलितखिन्नया यया ते ।
श्वसिति कथमसौ रसालशाखां
चिरविरहेण विलोक्य पुष्पिताग्राम् ? ।

श्लो ॥ वृष्टिव्याकुलगोकुला[1]वनरसा-
दुद्धृत्य गोवर्धनं
बिभ्रद्वल्लववल्लभाभिरधिका-
नन्दाच्चिरं चुम्बितः ।
दर्पेणैव तदर्पिताधरतटी-
सिन्दूरमुद्राङ्कितो
बाहुर्गोपतनोस्तनोतु भवतां
श्रेयांसि कंसद्विषः ॥ ३३

इति श्रीजयदेवकृतौ गीतगोविन्दे स्निग्ध-
मधुसूदनो नाम चतुर्थस्सर्गः ॥

---

1. वनवशा.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ पञ्चमः सर्गः ॥

॥ साकाङ्क्षपुण्डरीकाक्षः ॥

श्लो ॥ अहमिह निवसामि याहि राधां
अनुनय मद्वचनेन चानयेथाः ।
इति मधुरिपुणा सखी नियुक्ता
स्वयमिदमेत्य पुनर्जगाद राधाम् ॥ ३४

अष्टपदी १०.

॥ देशवराळिरागेण रूपकताळेन गीयते ॥

वहति मलयसमीरे मदनमुपनिधाय ।
स्फुटति कुसुमनिकरे विरहिहृदयदळनाय ।
तव विरहे वनमाली
सखि! सीदति, राधे! ॥ ध्रुवम् ॥ १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दहति शिशिरमयूखे मरणमनुकरोति।
पतति मदनविशिखे विलपति विकलतरोऽति।
तव विरहे वनमाली
सखि! सीदति, राधे! ॥ ध्रुव ॥ २

ध्वनति मधुपसमूहे श्रवणमपिदधाति।
मनसि चलितविरहे निशिनिशि रुजमुपयाति।
तव विरहे वनमाली
सखि! सीदति, राधे! ॥ ध्रुव ॥ ३

वसति विपिनविताने त्यजति ललितधाम।
लुठति धरणिशयने बहुविलपति तव नाम।
तव विरहे वनमाली
सखि! सीदति, राधे! ॥ ध्रुव ॥ ४

रणति पिकसमवाये प्रतिदिशमनुयाति।
हसति मनुजनिचये विरहमपलपति नेति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तव विरहे वनमाली
सखि ! सीदति, राधे ! ॥ ध्रुव ॥ ५

स्फुरति कलरवरावे स्मरति मणितमेव ।
तव रतिसुखविभवे गणयति सुगुणमतीव ।
तव विरहे वनमाली
सखि ! सीदति, राधे ! ॥ ध्रुव ॥ ६

त्वदभिधशुभदमासं वदति नरि शृणोति ।
तमपि जपति सरसं युवतिषु न रतिमुपैति ।
तव विरहे वनमाली
सखि ! सीदति, राधे ! ॥ ध्रुव ॥ ७

भणति कविजयदेवे विरहविलसितेन ।
मनसि रभसविभवे हरिरुदयतु सुकृतेन ।
तव विरहे वनमाली
सखि ! सीदति, राधे ! ॥ ध्रुव ॥ ८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ पूर्वं यत्र समं त्वया
रतिपतेरासादितास्सिद्धयः ।
तस्मिन्नेव निकुञ्जमन्मथ-
महातीर्थे पुनर्माधवः ।
ध्यायंस्त्वामनिशं जपन्नपि
तवैवा*लापमन्त्रावलीं ।
भूयस्त्वत्कुचकुम्भनिर्भर-
परीरम्भामृतं वाञ्छति ॥ ३५

अष्टपदी ११.

॥ घूर्जरीरागेण एकतालेन गीयते ॥

रतिसुखसारे गतमभिसारे
मदनमनोहरवेशम् ।
न कुरु नितम्बिनि ! गमनविलम्बन-
मनुसर तं हृदयेशम् ।

---

* नाममन्त्रावलीम्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धीरसमीरे यमुनातीरे
वसति वने वनमाली ।
गोपीपीनपयोधर[1]मर्दन-
चञ्चलकरयुगशाली ॥ ध्रुवम् ॥ १

नामसमेतं कृतसङ्केतं
वादयते मृदुवेणुम् ।
बहु मनुते [2]ऽतनु ते तनु-
सङ्गतपवनचलितमपि रेणुम् ॥
धीरसमीरे ... युगशाली ॥ ध्रुव ॥ २

पतति [3]पतत्रे विचलति पत्रे
शङ्कितभवदुपयानम् ।
रचयति शयनं सचकितनयनं
पश्यति तव पन्थानम् ॥
धीरसमीरे ... युगशाली ॥ ध्रुव ॥ ३

1. परिसरमर्दनकरः मर्दनचञ्चत्तर. 2. तनुते. 3. पतत्रिणि, विचलितपत्रे.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुखरमधीरं त्यज मञ्जीरं
रिपुमिव केळिषु लोलम् ।
चल सखि ! कुञ्जं सतिमिरपुञ्जं
शीलय नीलनिचोळम् ॥
धीरसमीरे ... युगशाली ॥ ध्रुव ॥ ४

उरसि मुरारेरुपहितहारे
घन इव तरळबलाके ।
तटिदिव पीते ! रतिविपरीते
राजसि सुकृतविपाके ॥
धीरसमीरे ... युगशाली ॥ ध्रुव ॥ ५

विगळितवसनं परिहृतर(श)सनं
घटय जघनमपिधानम् ।
किसलयशयने पङ्कजनयने !
निधिमिव हर्षनिदानम् ॥
धीरसमीरे ... युगशाली ॥ ध्रुव ॥ ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हरिरभिमानी रजनिरिदानी-

मियमपि याति विराममम् ।

कुरु मम वचनं सत्वररचनं

पूरय मधुरिपुकामम् ॥

धीरसमीरे ... युगशाली ॥ ध्रुव ॥ ७

श्रीजयदेवे कृतहरिसेवे

भणति परमरमणीयम् ।

प्रमुदितहृदयं हरिमतिसदयं

नमत सुकृतकमनीयम् ॥

धीरसमीरे ... युगशाली ॥ ध्रुव ॥ ८

श्लो ॥ विकिरति मुहुः श्वासान्दिशः

पुरो मुहुरीक्षते

प्रविशति मुहुः कुञ्जं

गुञ्जन् मुहुर्बहुताम्यति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रचयति मुहुश्शय्यां
पर्याकुलं मुहुरीक्षते
मदनकदनक्लान्तः कान्ते !
प्रियस्तव वर्तते ॥ ३६

श्लो ॥ त्वद्वाम्येन समं समग्र-
मधुना तिग्मांशुरस्तं गतो
गोविन्दस्य मनोरथेन च
समं प्राप्तं तमस्सान्द्रताम् ।
कोकानां करुण[1]स्वरेण सदृशी
दीर्घा मदभ्यर्थना
तन्मुग्धे ! विफलं विलम्बनमसौ
रम्योऽभिसारक्षणः ॥ ३७

---

1. स्वनेन.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ सामान्द्रक्ष्यतिवक्ष्यतिस्मरकथाः
प्रत्यङ्गमालिङ्गनैः
प्रीतिं यास्यति रंस्यते सखि !
समागत्येति चिन्ताकुलः ।
स त्वां पश्यति वेपते पुलक-
यत्यानन्दति स्विद्यति
प्रत्युद्गच्छति मूर्छति स्थिर-
तमःपुञ्जे निकुञ्जे स्थितः ॥ ३८

श्लो ॥ आश्लेषादनु चुम्बनादनु नखो-
ल्लेखादनु स्वान्तज-
प्रोद्बोधादनु सम्भ्रमादनु रता-
रम्भादनुप्रीतयोः ।
अन्यार्थं गतयोर्भ्रमान्मिलितयो-
स्सम्भाषणैर्जानतोः
दम्पत्योरिह को न को न तमसि
व्रीडाविमिश्रो रसः ॥ ३९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो॥ सभयचकितं विन्यस्यन्तीं
दृशौ तिमिरे पथि
प्रतितरु मुहुः स्थित्वा
मन्दं पदानि वितन्वतीम् ।
कथमपि रहः प्राप्ता-
मङ्गैरनङ्गतरङ्गिभिः
सुमुखि ! सुभगः पश्यन्
स त्वामुपैतु कृतार्थताम् ॥ ४०

श्लो॥ राधामुग्धमुखारविन्दमधुप
स्त्रैलोक्यमौळिस्थली
नेपथ्योचितनीलरत्नमवनी
भारावतारान्तकः[1] ।

---

1 तारक्षमः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वच्छन्दं व्रजसुन्दरीजनमन-
स्तोषप्रदोषोदयः
कंसध्वंसनधूमकेतुरवतु
त्वां देवकीनन्दनः ॥ ४१

इति श्री जयदेवविरचिते गीतगोविन्देऽभिसारिकावर्णने
साकांक्षपुण्डरीकाक्षो नाम पञ्चमस्सर्गः ॥

॥ षष्ठः सर्गः ॥

॥ धन्य(धृष्ट)वैकुण्ठः ॥

श्लो॥ अथ तां गन्तुमशक्तां चिरमनु-
रक्तां लतागृहे दृष्ट्वा ।
तच्चरितं गोविन्दे मनसिज
मन्दे सखी प्राह ॥ ४२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टपदी १२.

॥ गुणकरीरागेण रूपकतालेन गीयते ॥

पश्यति दिशिदिशि रहसि भवन्तं
[1]त्वदधरमधुरमधूनि पिबन्तम् ।
नाथ ! हरे ! जगन्नाथ ! हरे !
सीदति राधाऽऽवासगृहे ॥ ध्रुवम् ॥ १

त्वदभिसरणरभसेन [2]वलन्ती ।
पतति पदानि कियन्ति चलन्ती ॥
नाथ ! ... गृहे ॥ ध्रुवम् ॥ २

विहितविशदबिसकिसलयवलया ।
जीवति परमिह तव रतिकलया ॥
नाथ ! ... गृहे ॥ ध्रुवम् ॥ ३

1, तदधर. 2 चलन्ती.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुहुरवलोकित[1]मण्डनलीला ।
मधुरिपुरहमिति भावनशीला ॥
नाथ ! ... गृहे ॥ ध्रुवम् ॥ ४

त्वरितमुपैति न कथमभिसारम् ।
हरिरिति वदति सखीमनुवारम् ॥
नाथ ! ... गृहे ॥ ध्रुवम् ॥ ५

श्लिष्यति चुम्बति जलधरकल्पम् ।
हरिरुपगत इति तिमिरमनल्पम् ॥
नाथ ! ... गृहे ॥ ध्रुवम् ॥ ६

भवति विलम्बिनि विगलितलज्जा ।
विलपति रोदिति वासकसज्जा ॥
नाथ ! ... गृहे ॥ ध्रुवम् ॥ ७

श्रीजयदेवकवेरिदमुदितम् ।
रसिकजनं तनुतामतिमुदितम् ॥
नाथ ! ... गृहे ॥ ध्रुवम् ॥ ८

1. मण्डललीला.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो॥ विपुलपुलकपालिः स्फीतसीत्कारमन्त-
र्जनितजडिम काकुव्याकुलं व्याहरन्ती ।
तव कितव विधत्तेऽमन्दकन्दर्पचिन्तां
रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी ॥ ४३

श्लो॥ अङ्गेष्वाभरणं करोति
बहुशः पत्रेऽपि सञ्चारिणि
प्राप्तं त्वां परिशङ्कते वितनुते
शय्यां चिरं ध्यायति ।
इत्याकल्पविकल्पतल्परचना-
सङ्कल्पलीलाशत-
व्यासक्ताऽपि विना त्वया वरतनु
नैषा निशां नेष्यति ॥ ४४

श्लो॥ किं विश्राम्यसि कृष्णभोगिभवने
भाण्डीरभूमीरुहि ?
भ्रात! याहि न दृष्टिगोचरमित-
स्सानन्दनन्दास्पदम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राधाया वचनं तदध्वगमुखा-
न्नंदान्तिके गोपतो
गोविन्दस्य जयन्ति सायमतिथे
प्राशस्त्यगर्भा गिरः ॥ ४५

इति श्रीजयदेवविरचिते गीतगोविन्दे
धन्यवैकुण्ठो नाम षष्ठस्सर्गः ॥

॥ सप्तमः सर्गः ॥

(नागरनारायणः)

श्लो ॥ अत्रान्तरे च कुलटाकुलवर्त्मपात-
सञ्जातपातक इव स्फुटलाञ्छनश्रीः ।
वृन्दावनान्तरमदीपयदंशुजालैः
दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः ॥

श्लो ॥ प्रसरति शशधरबिंबे
विहितविलंबे च माधवे विधुरा ।
विरचितविविधविलापं
सा परितापं चकारोच्चैः ॥ ४७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टपदी १३.

॥ मालवरागयतिताळाभ्यां गीयते ॥

[1]कथितसमयेऽपि हरिरहह ! न ययौ वनं
मम विफलमिदममलरूपमपि यौवनम् ।
यामि हे ! कमिह शरणं
सखीजनवचनवञ्चिताऽहम् ? ॥ ध्रुवम् ॥ १

यदनुगमनाय निशि गहनमपि शीलितम् ।
तेन मम हृदयमिदमसमशरकीलितम् ॥
यामि ... वञ्चिताऽहम् ॥ ध्रुवम् ॥ २

मम मरणमेव वरमति वितथकेतना ।
[2]किमिति विषहामि विरहानलमचेतना ॥
यामि ... वञ्चिताऽहम् ॥ ध्रुवम् ॥ ३

1. ललित. 2. किमिह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मामहह ! विधुरयति मधुरमधुयामिनी ।
कापि हरिमनुभवति कृतसुकृतकामिनी ॥
यामि ... वञ्चिताऽहम् ॥ ध्रुवम् ॥ ४

अहह ! कलयामि वलयादिमणिभूषणम् ।
हरिविरहदहनवहनेन बहुदूषणम् ॥
यामि ... वञ्चिताऽहम् ॥ ध्रुवम् ॥ ५

कुसुमसुकुमारतनुमतनुशरलीलया ।
स्रगपि हृदि हन्ति मामतिविषमशीलया ॥
यामि ... वञ्चिताऽहम् ॥ ध्रुवम् ॥ ६

अहमिह हि निवसामि न विगणितवेतसा ।
स्मरति मधुसूदनो मामपि न चेतसा ॥
यामि ... वञ्चिताऽहम् ॥ ध्रुवम् ॥ ७

हरिचरणशरणजयदेवकविभारती ।
वसतु हृदि युवतिरिव कोमलकलावती ॥
यामि ... वञ्चिताऽहम् ॥ ध्रुवम् ॥ ८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

श्लो ।। तत्किं कामपि कामिनीमभिसृतः !
किं वा कलाकेलिभिः
बद्धो बन्धुभि ! रन्धकारिणि वना-
भ्यर्णे किमुद्भ्राम्यति !
कान्तः क्लान्तमना मनागपि
पथि प्रस्थातुमेवाक्षमः !
सङ्केतीकृतमंजुवंजुळलता-
कुंजेऽपि यन्नागतः ।। ४८

श्लो ।। अथागतां माधवमन्तरेण
सखीमियं वीक्ष्य विषादमूकाम् ।
विशङ्कमाना रमितं कयाऽपि
जनार्दनं दृष्टवदेतदाह ।। ४९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टपदी १४.

॥ वसन्तरागयतिताळाभ्यां गीयते ॥

स्मरसमरोचितविरचितवेशा

गळितकुसुमदरविलुलितकेशा ।

कापि मधुरिपुणा

विलसति युवति [1]रत्यधिकगुणा ॥ १

हरिपरिरम्भण[2]वलितविकारा

कुचकलशोपरि तरळितहारा ।

काऽपि ... ॥ गुणा ॥ २

विचलदलकललितानन चन्द्रा

तदधरपानरभसकृततन्द्रा ।

काऽपि ... ॥ गुणा ॥ ३

चञ्चलकुण्डलदलितकपोला

मुखरितरशन जघनगतिलोला ।

काऽपि ... ॥ गुणा ॥ ४

---

1. रधिकगुणा 2. ललित

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दयितविलोकितलज्जितहसिता

बहुविधकूजितरतिरससरसिता ।

काऽपि ... ॥ गुणा ॥ ५

विपुलपुलकपृथुवेपथुभङ्गा

श्वसितनिमीलितविकसदनङ्गा ।

काऽपि ... ॥ गुणा ॥ ६

श्रमजलकणभरसुभगशरीरा

परिपतितोरसि रतिरणधीरा ।

काऽपि ... ॥ गुणा ॥ ७

श्रीजयदेवभणितहरिरमितम्

कलिकलुषं जनयतु परिशमितं ।

काऽपि ... ॥ गुणा ॥ ८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ विरहपाण्डुमुरारिमुखांबुज-
द्युतिरयं तिरयन्नपि वेदनाम् ।
विधुरतीव तनोति मनोभुवः
सुहृदये हृदये मदनव्यथाम् ॥ ५८

अष्टपदी १५.

॥ घूर्जरीरागैकताळाभ्यां गीयते ॥

समुदितमदने रमणी-
वदने चुम्बनवलिताधरे ।
मृगमदतिलकं लिखति
सपुलकं मृगमिव रजनीकरे ॥
रमते यमुनापुलिनवने
विजयी मुरारिरधुना ॥ ध्रुवम् ॥ १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घनचयरुचिरे रचयति
चिकुरे तरलिततरुणानने ।
कुरवककुसुमं चपला-
सुषमं रतिपतिमृगकानने ॥
रमते ... मुरारिरधुना ॥ ध्रुवम् ॥ २

घटयति सुघने कुचयुग-
गगने मृगमदरुचिरूषिते ।
मणिवरममलं तारक-
पटलं नखपदशशिभूषिते ॥
रमते ... मुरारिरधुना ॥ ध्रुवम् ॥ ३

जितबिसशकले मृदुभुज-
युगळे करतलनळिनीदळे ।
मरकतवलयं मधुकर-
निचयं वितरति हिमशीतळे ॥
रमते ... मुरारिरधुना ॥ ध्रुवम् ॥ ४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रतिगृहजघने विपुला-
पघने मनसिजकनकासने ।
मणिमयरसनं तोरण-
हसनं विकिरति कृतवासने ॥
रमते ... मुरारिरधुना ॥ ध्रुवम् ॥ ५

चरणकिसलये कमलानिलये
नखमणिगणपूजिते ।
बहिरपवरणं यावक-
भरणं जनयति हृदि योजिते ॥
रमते ... मुरारिरधुना ॥ ध्रुवम् ॥ ६

रमयति सुदृशं कामपि
सुभृशं खलहलधरसोदरे ।
किमफलमवसं चिरमिह
विरसं वद सखि ! विटपोदरे ॥
रमते ... मुरारिरधुना ॥ ध्रुवम् ॥ ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इह रसभणने कृतहरि-
गुणने मधुरिपुपदसेवके ।
कलियुगचरितं न वसतु
दुरितं कविनृपजयदेवके ॥
रमते ... मुरारिरधुना ॥ ध्रुवम् ॥ ८

श्लो ॥ नायातस्सखि निर्दयो यदि
शठस्त्वं दूति! किं दूयसे ?
स्वच्छन्दं बहुवल्लभस्स
रमते किं तत्र ते दूषणम् ? ।
पश्याद्य प्रियसङ्गमाय
दयितस्याकृष्यमाणं गुणै-
रुत्कण्ठार्तिभरादिव स्फुट-
दिदं चेतस्स्वयं यास्यति ॥ ५१

—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टपदी १६.

॥ देशवराळीरागेण रूपकताळेन गीयते ॥

अनिलतरळकुवलयनयनेन

तपति न सा किसलयशयनेन ।

सखि! या रमिता वनमालिना ।

सखि!-या रमिता वनमालिना ॥ ध्रुवम् ॥ १

विकसितसरसिजललितमुखेन ।

स्फुटति न सा मनसिजविशिखेन ॥

सखि ! ... मालिना ॥ ध्रुवम् ॥ २

अमृतमधुरमृदुतरवचनेन ।

ज्वलति न सा मलयजपवनेन ॥

सखि ! ... मालिना ॥ ध्रुवम् ॥ ३

स्थलजलरुहरुचिकरचरणेन ।

लुठति न सा हिमकरकिरणेन ॥

सखि ! ... मालिना ॥ ध्रुवम् ॥ ४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सजलजलदसमुदयरुचिरेण ।
दळति न सा हृदि विरहभरेण ॥
सखि ! ... मालिना ॥ ध्रुवम् ॥ ५

कनकनिकषरुचिशुचिवसनेन ।
श्वसिति न सा परिजनहसनेन ॥
सखि ! ... मालिना ॥ ध्रुवम् ॥ ६

सकलभुवनजनवरतरुणेन ।
वहति न सा रुजमतिकरुणेन ॥
सखि ! ... मालिना ॥ ध्रुवम् ॥ ७

श्रीजयदेवभणितवचनेन ।
प्रविशतु हरिरपि हृदयमनेन ॥
सखि ! ... मालिना ॥ ध्रुवम् ॥ ८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ।। मनोभवानन्दन ! चन्दनानिल !
प्रसीद रे दक्षिण ! मुञ्च वामताम् ।
क्षणं जगत्प्राण ! निधाय माधवं
पुरो मम प्राणहरो भविष्यसि ॥ ५२

श्लो ।। रिपुरिव सखीसंवासोऽयं
शिखीव हिमानिलो
विषमिव सुधारश्मिर्यस्मिन्
दुनोति मनोगते ।
हृदयमदये तस्मिन्नेवं
पुनर्वलते बलात्
कुवलयदृशां वामः
कामो निकामनिरङ्कुशः ॥ ५३

श्लो ।। बाधां विधेहि मलयानिल ! पञ्चबाण !
प्राणान् गृहाण न गृहं पुनराश्रयिष्ये।
किं ते कृतांतभगिनि ! क्षमया तरङ्गैः
अङ्गानि सिंच मम शाम्यतु देहदाहः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ प्रातर्नीलनिचोलमच्युत-
मुरस्संवीतपीतांबरं
राधायाश्चकितं विलोक्य
हसति स्वैरं सखीमण्डले ।
व्रीडाचञ्चलमञ्चलं नयन-
योराधाय राधानने
स्वादुस्वैरमुखोऽयमस्तु
जगदानन्दाय नन्दात्मजः ॥ ५५

इति श्रीजयदेवकृतौ गीतगोविन्दे विप्रलब्धावर्णने
नागरनारायणो नाम सप्तमस्सर्गः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ अष्टमः सर्गः ॥

(विलक्षलक्ष्मीपतिः)

श्लो ॥ अथ कथमपि यामिनीं विनीय
स्मरशरजर्जरिताऽपि सा प्रभाते ।
अनुनयवचनं वदन्तमग्रे
प्रणतमपि प्रियमाह साभ्यसूयम् ॥ ५६

अष्टपदी १७.

॥ भैरवीरागयतिताळाभ्यां गीयते ।

रजनिजनितगुरुजागर-
रागकषायितमलसनिमेषम् ।
वहति नयनमनुरागमिव
स्फुटमुदितरसाभिनिवेशम् ॥
(हरिहरि!) ...

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

याहि माधव ! याहि
केशव ! मावद कैतववादम् ।
तामनुसर सरसीरुहलोचन !
या तव हरति विषादम् ।। ध्रुवम् ।। १

कज्जलमलिनविलोचनचुम्बन-
विरचितनीलिमरूपम् ।
दशनवसनमरुणं तव कृष्ण !
तनोति तनोरनुरूपम् ।।
(हरिहरि !) याहि ... विषादम् ।। ध्रुवम् ।। २

वपुरनुहरति तव स्मर-
सङ्गरखरनखरक्षतरेखम् ।
मरकतशकलकलितकल-
धौतलिपेरिव रतिजयलेखम् ।।
(हरिहरि !) याहि ... विषादम् ।। ध्रुवम् ।। ३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चरणकमलगळदलक्तसिक्त-

मिदं तव हृदयमुदारम् ।

दर्शयतीव बहिर्मदन-

द्रुमनवकिसलयपरिवारम् ॥

(हरिहरि !) याहि ... विषादम् ॥ ध्रुवम् ॥ ४

दशनपदं भवदधरगतं

मम जनयति चेतसि खेदम् ।

कथयति कथमधुनाऽपि मया

सह तव वपुरेतदभेदम् ॥

(हरिहरि !) याहि ... विषादम् ॥ ध्रुवम् ॥ ५

बहिरिव मलिनतरं तव कृष्ण !

मनोऽपि भविष्यति नूनम् ।

कथमथ वञ्चयसे जनमनु-

गतमसमशरज्वरदूनम् ? ॥

(हरिहरि !) याहि ... विषादम् ॥ ध्रुवम् ॥ ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भ्रमति भवानबलाकबलाय
 वनेषु किमत्र विचित्रम् ।
प्रथयति पूतनिकैव वधू-
 वधनिर्दयबालचरित्रम् ॥
(हरिहरि !) याहि ... विषादम् ॥ ध्रुवम् ॥ ७

श्रीजयदेवभणितरतिवञ्चित-
 खण्डितयुवतिविलापम् ।
शृणुत सुधामधुरं विबुधा
 विबुधालयतोऽपि दुरापं ॥
(हरिहरि!) याहि ... विषादम् ॥ ध्रुवम् ॥ ८

श्लो ॥ तवेदं पश्यंत्याः प्रसर-
 दनुरागं बहिरिव
प्रियापादालक्तच्छुरित-
 मरुण*च्छायहृदयम् ।

---

* द्योति हृदयम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ममाद्य प्रख्यातप्रणय-
भरभङ्गेन कितव !
त्वदालोकश्शोकादपि
किमपि लज्जां जनयति ॥ ५७

श्लो ॥ अन्तर्मोहनमौळिघूर्णन-
चलन्मन्दारविभ्रंशन-
स्तम्भाकर्षणदृप्तिहर्षण-
महामन्त्रः कुरङ्गीदृशाम् ।
दृप्यद्दानवदूयमानदिवि-
षद्दुर्वारदुःखापदां
भ्रंशः कंसरिपोर्विपोलयतु
वः श्रेयांसि वंशीरवः ॥ ५८

इति श्रीजयदेवपद्धतौ श्री गीतगोविन्दे खण्डितावर्णने
विलक्ष्यलक्ष्मीपतिर्नामाष्टमः सर्गः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ नवमः सर्गः ॥

(मुग्धमुकुन्दः)

श्लो ॥ तामथ मन्मथखिन्नां
रतिरसभिन्नां विषादसंपन्नाम् ।
अनुचिंतितहरिचरितां
कलहान्तरितामुवाच रहसि सखी ॥५९

अष्टपदी १८.

॥ घूर्जरीरागयतितालाभ्यां गीयते ॥

हरिरभिसरति वहति मधुपवने
किमपरमधिकसुखं सखि ! भवने ? ।
माधवे
मा कुरु मानिनि ! मानमये ॥ ध्रुवम् ॥ १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ताळफलादपि गुरुमतिसरसं ।
किमु विफलीकुरुषे कुचकलशम् ? ॥
माधवे ... मानमये ॥ ध्रुवम् ॥ २

कति न कथितमिदमनुपदमचिरं ।
मा परिहर हरिमतिशयरुचिरम् ॥
माधवे ... मानमये ॥ ध्रुवम् ॥ ३

किमिति विषीदसि रोदिषि विकला ? ।
विहसति युवतिसभा तव सकला ॥
माधवे ... मानमये ॥ ध्रुवम् ॥ ४

मृदुनळिनीदळशीतळशयने ।
हरिमवलोकय सफलय नयने ॥
माधवे ... मानमये ॥ ध्रुवम् ॥ ५

जनयसि मनसि किमिति गुरुखेदम् ।
शृणु मम वचनमनीहितभेदम् ॥
माधवे ... मानमये ॥ ध्रुवम् ॥ ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हरिरुपयातु वदतु बहुमधुरम् ।
किमिति करोषि हृदयमतिविधुरम् ॥
माधवे ... मानमये ॥ ध्रुवम् ॥ ७

श्रीजयदेवभणितमतिललितं ।
सुखयतु रसिकजनं हरिचरितम् ॥
माधवे ... मानमये ॥ ध्रुवम् ॥ ८

श्लो ॥ स्निग्धे यत्परुषाऽसि य-
त्प्रणमति स्तब्धाऽसि यद्रागिणि
द्वेषस्थाऽसि यदुन्मुखे विमु-
खतां याताऽसि तस्मिन् प्रिये ।
तद्युक्तं विपरीतकारिणि !
तव श्रीखण्डचर्चा विषं
शीतांशुस्तपनो हिमं हुत-
वहः क्रीडामुदो यातनाः ॥ ६०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ सान्द्रानन्दपुरन्दरादि-
दिविषद्वृन्दैरमन्दादरात्
आनम्रैर्मकुटेन्द्रनील-
मणिभिस्संदर्शितेंदिन्दिरम् ।
स्वच्छंदं मकरन्दसुन्दर-
मिळन्मन्दाकिनीमेदुर-
श्रीगोविन्दपदारविन्द-
मशुभस्कन्दाय वन्दामहे ॥ ६१

इति श्रीजयदेवकृतौ गीतगोविन्दे कलहान्तरितवर्णने
मुग्धमुकुन्दो नाम नवमस्सर्गः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ दशमः सर्गः ॥

(चतुरचतुर्भुजः)

श्लो ॥ अत्रान्तरे मसृण[1]रोषवशामपार-
निःश्वासनिस्सहमुखीं सुमुखीमुपेत्य ।
सव्रीडमीक्षितसखीवदनां दिनान्ते
सानन्दगद्गदपदं हरिरित्युवाच ॥ ६२

अष्टपदी १९.

॥ देशवराळीरागाष्टताळाभ्यां गीयते ॥

वदसि यदि किंचिदपि दन्तरुचिकौमुदी
हरति दरतिमिरमतिघोरं
स्फुरदधरशीधवे तव वदनचन्द्रमा
रोचयतु लोचनचकोरम् ।

---

1. कोपवशामसार ; कोपवशामसीम
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रिये ! चारुशीले ! प्रिये ! चारुशीले !
मुञ्च मयि मानमनिदानं
सपदि मदनानलो दहति मम मानसं
देहि मुखकमलमधुपानम् ॥ ध्रुवम् ॥ १

सत्यमेवासि यदि सुदति ! मयि कोपिनी
देहि खरनखरशरघातम् ।
घटय भुजबन्धनं जनय रदखण्डनं
येन वा भवति सुखजातम् ॥
प्रिये ! ... मधुपानम् ॥ ध्रुवम् ॥ २

त्वमसि मम भूषणं त्वमसि मम जीवनं
त्वमसि मम भवजलधिरत्नम् ।
भवतु भवतीह मयि सततमनुरोधिनी
तत्र मम हृदयमतियत्नम् ॥
प्रिये ! ... मधुपानम् ॥ ध्रुवम् ॥ ३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नीलनलिनाभमपि तन्वि ! तव लोचनं
धारयति कोकनदरूपम् ।
कुसुमशरबाणभावेन यदि रञ्जयसि
कृष्णमिदमेतदनुरूपम् ॥
प्रिये ! ... मधुपानम् ॥ ध्रुवम् ॥ ४

स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी
रञ्जयतु तव हृदयदेशम् ।
रसतु रशनाऽपि तव घनजघनमण्डले
घोषयतु मन्मथनिदेशम् ॥
प्रिये ! ... मधुपानम् ॥ ध्रुवम् ॥ ५

स्थलकमलगञ्जनं मम हृदयरञ्जनं
जनितरतिरङ्गपरभागम् ।
भण मसृणवाणि ! करवाणि चरणद्वयं
सरसलसदलक्तकसरागम् ॥
प्रिये ! ... मधुपानम् ॥ ध्रुवम् ॥ ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्मरगरलखण्डनं मम शिरसि मण्डनं
धेहि पदपल्लवमुदारम् ।
ज्वलति मयि दारुणो मदनकदनानलो
हरतु तदुपाहितविकारम् ॥

प्रिये ! ... मधुपानम् ॥ ध्रुवम् ॥ ७

इति चटुलचाटुपटुचारु मुरवैरिणो
राधिकामधि वचनजातम् ।
जयति जयदेवकविभारतीभूषितं
मानिनीजनजनितशातम् ॥

प्रिये ! ... मधुपानम् ॥ ध्रुवम् ॥ ८

श्लो ॥ परिहर कृतातङ्के ! शङ्कां
त्वया सततं घन-
स्तनजघनयाऽऽक्रान्ते
स्वान्ते परानवकाशिनि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विशति वितनोरन्यो
न कोऽपि ममान्तरं
प्रणयिनि ! परीरम्भारम्भे
विधेहि विधेयताम् ॥ ६३

श्लो ॥ मुग्धे ! विधेहि मयि निर्दयदन्तदंशं-
दोर्वल्लिबन्धनिविडस्तनपीडनानि ।
चण्डि ! त्वमेव मुद[1]मुद्वह पञ्चबाण-
[2]चण्डालकाण्डदळनादसवः [3]प्रयान्ति ॥

श्लो ॥ शशिमुखि ! तव भाति भङ्गुरभ्रूः
युवजनमोहकराळकाळसर्पी ।
तदुदितभयभञ्जनाय यूनां
त्वदधरशीधुसुधैव सिद्धमन्त्रः ॥ ६५

---

1. मुञ्च मम स ; 2. चाण्डाल. 3. प्रयान्तु.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ व्यथयति वृथा मौनं
तन्वि! प्रपञ्चय पञ्चमं
तरुणि! मधुरालापै-
स्तापं विनोदय दृष्टिभिः।
सुमुखि! विमुखीभावं
तावद्विमुञ्च न मुञ्च मां
स्वयमतिशयस्निग्धो मुग्धे!
प्रियोऽयमुपस्थितः ॥ ६६

श्लो ॥ बन्धूकद्युतिबान्धवोऽय-
मधरः स्निग्धो मधूकच्छविः
गण्डश्चण्डि! चकास्ति नील-
नलिनश्रीमोचनं लोचनम्।
नासाऽभ्येति तिलप्रसून-
पदवीं कुन्दाभदन्ति! प्रिये!
प्रायस्त्वन्मुखसेवया
विजयते विश्वं स पुष्पायुधः ॥ ६७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ दृशौ तव मदालसे
वदनमिन्दुसंदीपनं
गतिर्जनमनोरमा
विजितरम्भमूरुद्वयम् ।
रतिस्तव कलावती रुचिर-
चित्रलेखे भ्रुवा-
वहो विबुधयौवतं
वहसि तन्वि ! पृथ्वीगता ॥ ६८

श्लो॥ [1]स प्रीतिं तनुतां हरिः
कुवलयापीडेन सार्धं रणे
राधापीनपयोधरस्मरण-
कृत्कुम्भेन सम्भेदवान् ।

1. प्रीतिं वस्तनुताम्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्र खिद्यति मीलति [1]क्षण-
मपि क्षिप्रं त[2]दालोकनात्
कंसस्यालमभूज्जितं जित-
मिति व्यामोहकोलाहलः ॥ ६९

इति श्रीजयदेवकृतौ श्रीगीतगोविन्दे मानिनीवर्णने
चतुरचतुर्भुजो नाम दशमः सर्गः ॥

॥ एकादशः सर्गः ॥

(सानन्ददामोदरः)

श्लो ॥ सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं
गतवति कृतवेशे केशवे कुञ्जशय्याम् ।
रचितरुचिरभूषां दृष्टिमोषे प्रदोषे
स्फुरति निरवसादां कापि राधां जगाद ॥

---

1. क्षण मथ क्षिप्ते द्विपे तत्क्षणात्. 2. दालोकन, व्यामोहेन जितं जितं जितमभूत्कंसस्य कोलाहलः.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टपदी २०.

॥ वसन्तरागयतिताळाभ्यां गीयते ॥

विरचितचाटुवचनरचनं
चरणे रचितप्रणिपातम् ।
सम्प्रतिमञ्जुळवञ्जुलसीमनि
केळिशयन[1]मनुयातम् ॥
मुग्धे ! मधुमथन मनुगतमनुसर राधे ! ॥ ध्रुवम् ॥

घनजघनस्तनभारभरे
दरमन्थरचरणविहारम् ।
मुखरितमणिमञ्जीरमुपैहि
विधेहि मराळ [2]निकारम् ॥

मुग्धे ! ... राधे ! ॥ ध्रुवम् ॥ २
शृणु रमणीयतरं तरुणी-
जनमोहनमधुरिपुरावम् ।

1. मुपयातम्. 2. विकारम्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुसुमशरासनशासनवन्दिनि
पिकनिकरे भज भावम् ॥
मुग्धे! ... राधे! ॥ ध्रुवम् ॥ ३

अनिलतरलकिसलयनिकरेण
करेण लतानिकुरम्बम् ।
प्रेरणमिव करभोरु! करोति
गतिं प्रति मुञ्च विलम्बम् ॥
मुग्धे! ... राधे! ॥ ध्रुवम् ॥ ४

स्फुरितमनङ्गतरङ्गवशा-
दिव सूचितहरिपरिरम्भम् ।
पृच्छ मनोहरहारविमल-
जलधारममुं कुचकुम्भम् ॥
मुग्धे! ... राधे! ॥ ध्रुवम् ॥ ५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधिगतमखिलसखीभिरिदं
तव वपुरपि रतिरणसज्जम् ।
चण्डि ! रणितरशनारवडिण्डिम-
मभिसर सरसमलज्जम् ॥
मुग्धे ! ... राधे ! ॥ ध्रुवम् ॥ ६

स्मरशरसुभगनखेन सखी-
मवलम्ब्य करेण सलीलम् ।
चल वलयक्वणितैरवबोधय
हरिमपि निगदितशीलम् ॥
मुग्धे ! ... राधे ! ॥ ध्रुवम् ॥ ७

श्रीजयदेवभणितमधरी-
कृतहारमुदासितवामम् ।
हरिविनिहितमनसामधि-
तिष्ठतु कण्ठतटीमविरामम् ॥
मुग्धे ! ... राधे ! ॥ ध्रुवम् ॥ ८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ अक्ष्णोर्निक्षिपदञ्जनं
श्रवणयोस्तापिञ्छगुच्छावलीं
मूर्ध्नि श्यामसरोजदाम
कुचयोः कस्तूरिकापत्रकम् ।
धूर्तानामभिसारसम्भ्रमजुषां
विष्वङ्गनिकुञ्जे सखि !
ध्वान्तं नीलनिचोलचारु
सुदृशां प्रत्यङ्गमालिङ्गति ॥ ७१

श्लो ॥ काश्मीरगौरवपुषामभिसारिकाणां
आबद्धरेखमभितो रुचिमञ्जरीभिः ।
एतत्तमालदलनीलतमं तमिस्रं
तत्प्रेमहेमनिकषोपलतां तनोति ॥ ७२

श्लो ॥ हारावलीतरलकाञ्चनकाञ्चिदाम-
मञ्जीरकंकणमणिद्युतिदीपितस्य ।
द्वारे निकुञ्जनिलयस्य हरिं निरीक्ष्य
व्रीडावतीमथ सखीमियमित्युवाच ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टपदी २१.

॥ वराळीराग रूपकताळाभ्यां गीयते ॥

मञ्जुतरकुञ्जतलकेळिसदने

इह विलस रतिरभसहसितवदने ।

प्रविश राधे ! माधवसमीपमिह ॥

(कुरु मुरारे ! मङ्गळशतानि) ॥ ध्रुवम् ॥ १

नवभवदशोकदळशयनसारे ।

इह विलस कुचकलशतरळहारे ॥

प्रविश ... मङ्गळशतानि ॥ ध्रुवम् ॥ २

कुसुमचयरचितशुचिवासगेहे ।

इह विलस कुसुमसुकुमारदेहे ॥

प्रविश ... मङ्गळशतानि ॥ ध्रुवम् ॥ ३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चलमलयवनपवनसुरभिशीते ।
इह विलस मदनशरनिकरभीते ॥
प्रविश ... मङ्गळशतानि ॥ ध्रुवम् ॥ ४

विततबहुवल्लिनवपल्लवघने ।
इह विलस पीनकुचकुम्भजघने ॥
प्रविश ... मङ्गळशतानि ॥ ध्रुवम् ॥ ५

मधुमुदितमधुपकुलकलितरावे ।
इह विलस कुसुमशरसरसभावे ॥
प्रविश ... मङ्गळशतानि ॥ ध्रुवम् ॥ ६

मधुतरळपिकनिकरनिनदमुखरे ।
इह विलस दशनरुचिरुचिरशिखरे ॥
प्रविश ... मङ्गलशतानि ॥ ध्रुवम् ॥ ७

विहितपद्मावतीसुखसमाजे ।
भणति जयदेवकविराजराजे ॥
प्रविश ... मङ्गलशतानि ॥ ध्रुवम् ॥ ८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ त्वां चित्तेन चिरं वह-
न्नयमतिश्रान्तो भृशं तापितः
कन्दर्पेण च पातुमिच्छति
सुधासम्बाधबिम्बाधरम् ।
अस्याङ्कं तदलंकुरु
क्षणमिह भ्रूक्षेपलक्ष्मीलव-
क्रीते दास इवोपसेवित-
पदाम्भोजे कुतः सम्भ्रमः ? ॥ ७४

श्लो ॥ सा ससाध्वससानन्दं
गोविन्दे लोललोचना ।
शिञ्जानमञ्जुमञ्जीरं
प्रविवेश निवेशनम् ॥ ७५

—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकादशः सर्गः

.ഠ.ൗ

अष्टपदी २२.

॥ वराळिरागयतितालाभ्यां गीयते ॥

राधावदनविलोकन-
विकसितविविधविकारविभङ्गम् ।
जलनिधिमिव विधुमण्डल-
दर्शनतरलिततुङ्गतरङ्गम् ॥
हरिमेकरसं चिर-
मभिलषितविलासम् ।
सा ददर्श गुरुहर्षवशंवद-
वदनमनङ्गनिवासम् ॥ ध्रुवम् ॥ १

हारममलतरतारमुरसि
दधतं परिरभ्य विदूरम् ।
स्फुटतरफेनकदम्बकरम्बित-
मिव यमुनाजलपूरम् ॥
हरिमेकरसं ... निवासम् ॥ ध्रुवम् ॥ २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्यामलमृदुलकलेबर-
मण्डलमधिगतगौरदुकूलम् ।
नीलनलिनमिव पीतपराग-
पटलभरवलयितमूलम् ॥
हरिमेकरसं ... निवासम् ॥ ध्रुवम् ॥ ३

तरलदृगञ्चलचलनमनो-
हरवदनजनितरतिरागम् ।
स्फुटकमलोदरखेलित-
खञ्जनयुगमिव शरदि तडाकम् ॥
हरिमेकरसं ... निवासम् ॥ ध्रुवम् ॥ ४

वदनकमलपरिशीलनमिलित-
मिहिरसमकुण्डलशोभम् ।
स्मितरुचिरुचिरसमुल्लसिता-
धरपल्लवकृतरतिलोभम् ॥
हरिमेकरसं ... निवासम् ॥ ध्रुवम् ॥ ५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शशिकिरणच्छुरितोदरजल-
धरसुन्दरसकुसुमकेशम् ।
तिमिरोदितविधुमण्डल-
निर्मलमलयजतिलकनिवेशम् ॥
हरिमेकरसं ... निवासम् ॥ ध्रुवम् ॥ ६

विपुलपुलकभरदन्तुरितं
रतिकेलिकलाभिरधीरम् ।
मणिगणकिरणसमूहसमु-
ज्ज्वलभूषणसुभगशरीरम् ॥
हरिमेकरसं ... निवासम् ॥ ध्रुवम् ॥ ७

श्रीजयदेवभणितविभव-
द्विगुणीकृतभूषणभारम् ।
प्रणमत हृदि विनिधाय हरिं
रुचिरं सुकृतोदयसारम् ॥
हरिमेकरसं ... निवासम् ॥ ध्रुवम् ॥ ८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो॥ अतिक्रम्यापाङ्गं श्रवण-
पथपर्यन्तगमन-
प्रयासेनेवाक्ष्णो[1]स्तरल-
तरभावं [2]गमितयोः ।
[3]इदानीं राधायाः प्रिय-
तम[4]समालोकसमये
पपात [5]स्वेदाम्बुप्रसर
इव हर्षाश्रुनिकरः ॥ ७६

श्लो॥ भजन्त्यास्तल्पान्तं कृत-
कपटकण्डूति[6]पिहित-
स्मितं याते गेहाद्बहि-
रपि हितालीपरिजने ।

1. स्मल्लतरतारं. 2. पतितयोः. 3. तदानीं.
4 समायातसमये 5. स्वेदम्भः. 6. विहित.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रियास्यं पश्यन्त्याः
[1]स्मरपरवशाकूतसुभगं
सलज्जा लज्जाऽपि व्यगम-
दिव दूरं मृगदृशः ॥ ७७

श्लो ॥ सानन्दं नन्दसूनुर्दिशतु
परतरं संमदं मन्दमन्दं
राधामाधाय बाह्वोर्विवरमनु
दृढं पीडयन्प्रीतियोगात् ।
तुङ्गौ तस्या उरोजाव[2]तनु
वरतनोर्निर्गतौ मा स्म भूतां
पृष्ठं निर्भिद्य तस्माद्बहिरिति
वलितग्रीवमालोकयन्तः ॥ ७८

श्लो ॥ जयश्रीविन्यस्तैर्महित इव मन्दारकुसुमैः
स्वयं सिन्दूरेण द्विपरणमुदा मुद्रित इव ।

1. स्मरसरसमाकूत. 2. तनुचलस्तनो.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भुजापीडक्रीडाहतकुवलयापीडकरिणः
प्रकीर्णासृग्बिन्दुर्जयति भुजदण्डो मुरजितः ॥

श्लो॥ सौन्दर्यैकनिधेरनङ्ग-
ललनालावण्यलीलाजुषो
राधाया हृदि पल्वले
मनसिजक्रीडैकरङ्गस्थले ।
रम्योरोजसरोजखेलन-
रसित्वादात्मनः ख्यापय-
न्ध्यातुर्मानसराजहंस-
निभतां देयान्मुकुन्दो मुदम् ॥ ८०

इति श्रीजयदेवकृतौ श्रीगीतगोविन्दे [1]राधिकामिलने
सानन्ददामोदरो नामैकादशः सर्गः ॥ ११ ॥

---

1. अभिसारिकावर्णने सानन्दगोविन्दः.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ द्वादशः सर्गः ॥

॥ सुप्रीतपीताम्बरः ॥

श्लो॥ गतवति सखीवृन्देऽ-
मन्दत्रपाभरनिर्भर-
स्मर[1]परवशाकूतस्फीत-
स्मितस्नपिताधराम् ।
सरस[2]मनसं दृष्ट्वा-
राधां मुहुर्नवपल्लव-
प्रसवशयने [3]निक्षिप्ताक्षी-
मुवाच हरिः प्रियाम् ॥ ८१

—

1. शरपराकूतः 2. मलसं. 3. विक्षिप्ताक्षी.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टपदी २३.

॥ विभासरागैकतालीतालाभ्यां गीयते ॥

किसलयशयनतले कुरु
कामिनि! [1]चरणनलिनविनिवेशम् ।
तव पदपल्लववैरिपरा-
भवमिदमनुभवतु सुवेशम् ॥
क्षणमधुना नारायण-
मनुगतमनुसर राधे! ॥ ध्रुवम् ॥ १

करकमलेन करोमि चरण-
महमागमितासि विदूरम् ।
क्षणमुपकुरु शयनोपरि
मामिव [2]नूपुरमनुगतिशूरम् ॥
क्षणमधुना ... राधे! ॥ ध्रुवम् ॥ २

3. चरणकमल. 2. नूपुरमनुगतशूरम्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वदनसुधानिधिगलितममृत-
मिव रचय वचनमनुकूलम् ।
विरहमिवापनयामि पयो-
धररोधकमुरसि दुकूलम् ॥
क्षणमधुना ... राधे ! ॥ ध्रुवम् ॥ ३

प्रियपरिरम्भणरभसवलित-
मिव पुलकितमतिदुरवापम ।
मदुरसि कुचकलशं विनिवे-
शय शोषय मनसिजतापम् ॥
क्षणमधुना ... राधे ॥ ध्रुवम् ॥ ४

अधरसुधारसमुपनय
भामिनि ! जीवय मृतमिव दासम् ।
त्वयि विनिहितमनसं
विरहानलदग्धवपुषमविलासम् ॥
क्षणमधुना ... राधे ! ॥ ध्रुवम् ॥ ५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शशिमुखि ! मुखरय मणि-
रशनागुणमनुगुणकण्ठनिनादम् ।
श्रुतियुगले पिकरुतविकले
मम शमय चिरादवसादम् ॥
क्षणमधुना ... राधे ! ॥ ध्रुवम् ॥ ६

मामतिविफलरुषा विकली-
कृतमवलोकितुमधुनेदम् ।
[1]मीलति लज्जितमिव नयनं
तव विरम विसृज रतिखेदम् ॥
क्षणमधुना ... राधे ॥ ध्रुवम् ॥ ७

श्रीजयदेवभणितमिदमनु-
पदनिगदितमधुरिपुमोदम् ।
जनयतु रसिकजनेषु मनो-
रमरतिरसभावविनोदम् ॥
क्षणमधुना ... राधे ! ॥ ध्रुवम ॥ ८

1. मीलित लज्जित.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ प्रत्यूहः पुलकाङ्कुरेण
निबिडाश्लेषे निमेषेण च
क्रीडाकूतविलोकितेऽधर-
सुधापाने कथानर्मभिः ।
आनन्दाधिगमेन मन्मथकला-
युद्धेऽपि यस्मिन्नभू-
दुद्भूतः स तयोर्बभूव
[1]सुरतारम्भः प्रियम्भावुकः ॥ ८२

श्लो ॥ दोर्भ्यां संयमितः पयो-
धरभरेणापीडितः पाणिजै-
राविद्धो दशनैः [2]क्षताधर-
पुटः श्रोणीतटेनाहतः ।

---

1. 'ललितारम्भः' 2. 'क्षतोऽधरपुटः'

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हस्तेनानमितः कचेऽधर-
सुधास्यन्देन संमोहितः
कान्तः कामपि तृप्तिमाप
तदहो कामस्य वामा गतिः ॥ ८३

श्लो॥ [1]वामाङ्के रतिकेलिसंकुल-
रणारम्भे तया साहस-
प्रायं कान्तजयाय किंचि-
दुपरि प्रारम्भि [2]यत्सम्भ्रमात् ।
निष्पन्दा जघनस्थली [3]शिथिलिता
दोर्वल्लिरुत्कम्पितं
वक्षो मीलितमक्षि पौरुष-
रसः स्त्रीणां कुतः सिध्यति ॥ ८४

1. 'माराङ्के' 2. 'यत्साहसात्' 3. 'शिथिलता'.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वादशः सर्गः

श्लो ॥ तस्याः [1]पाटलपाणिजाङ्कित-
मुरो निद्राकषाये दृशौ
[2]निर्धौतोऽधरशोणिमा विलु-
लितास्त्रस्तास्स्रजो मूर्धजाः ।
काञ्चीदाम दरश्लथाञ्चल-
मिति प्रातर्निखातैर्दृशो-
रेभिः कामशरैस्तदद्भुत-
मभूत्पत्युर्मनः कीलितम् ॥[3] ८५

श्लो ॥ [4]व्याकोशः केशपाशस्तरलित-
मलकैः स्वेदमोक्षौ कपोलौ
क्लिष्टा बिम्बाधरश्रीः कुच-
कलशरुचा हारिता हारयष्टिः ।

---

1. पाटव. 2. निर्धूतोऽधर. 3. त्वामप्राप्य मयि स्वयंवरपरां क्षीरोदतीरोदरे शङ्के सुन्दरि ! कालकूटमपिबन्मूढो मृडानीपतिः । इत्थं पूर्वकथाभिरन्यमनसो विक्षिप्य वामाञ्चलं राधायाः स्तनकोरकोपरि चलन्नेत्रो हरिः पातु वः. 4. व्यालोलः.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काञ्चीकान्तिर्हताशा स्तन-
जघनपदं पाणिनाच्छाद्य सद्यः
पश्यन्ती सत्रपा सा तदपि
विलुलिता मुग्धकान्तिर्धिनोति ॥ ८६

श्लो ॥ ईष[1]न्मीलितदृष्टि [2]मुग्ध-
विलसत्सीत्कारधारावशा-
दव्यक्ताकुलकेलिकाकु-
विकसद्दन्तांशुधौताधरम् ।
[3]शान्तस्तब्धपयोधरं भृश-
परिष्वङ्गात्कुरङ्गीदृशो
हर्षोत्कर्ष[4]विमुक्तनिःसह-
तनोर्धन्यो धयत्याननम् ॥ ८७

1. मीलद्दृष्टि. 2. मुग्धहसितं. 3. श्वासोत्कम्पिपयोधरोपरि परिष्वङ्गात्. 4. विमुक्ति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ [1]अथ सहसा सुप्रीतं
सुरतान्ते सा नितान्तखिन्नाङ्गी ।
राधा जगाद सादर-
मिदमानन्देन गोविन्दम् ॥ ८८

अष्टपदी २४.

॥ रामक्रियारागयतितालाभ्यां गीयते ॥

कुरु यदुनन्दन! चन्दन-
शिशिरतरेण करेण पयोधरे ।
मृगमदपत्रकमत्र मनो-
भवमङ्गलकलशसहोदरे ॥
निजगाद सा यदुनन्दने
क्रीडति हृदयानन्दने ॥ ध्रुवम् ॥ १

---

1. अथ कान्तं रतिश्रान्तमपि मण्डनवाञ्छया ।
जगाद माधवं मुग्धा राधा स्वाधीनभर्तृका.
अथ कान्तं रतिश्रान्तं अभिमण्डनवाञ्छया ।
जगाद माधवं राधा मुग्धा स्वाधीनभर्तृका ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अलिकुल[1]गञ्जनमञ्जनकं
रतिनायकसायकमोचने ।
त्वदधरचुम्बनलम्बित-
[2]कज्जल उज्ज्वलय प्रिय! लोचने ॥
निजगाद ... नन्दने ॥ ध्रुवम् ॥ २

नय कुरङ्गतरङ्गविकास-
निरासकरे श्रुतिमण्डले ।
मनसिजपाशविलासधरे
शुभवेश! निवेशय कुण्डले ॥
निजगाद ... नन्दने ॥ ध्रुवम् ॥ ३

भ्रमरचयं रचयन्तमुपरि
[3]रुचिरं सुचिरं मम संमुखे ।
जितकमले विमले परिकर्मय
नर्मजनकमलकं मुखे ॥
निजगाद ... नन्दने ॥ ध्रुवम् ॥ ४

---

1. गञ्जनपञ्जनकं. 2. कज्जलमुज्ज्वलय. 3. सुचिरं रुचिरं.

Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मृगमदरसवलितं ललितं
कुरु तिलकमलिकरजनीकरे ।
विहितकलङ्ककलं कमलानन!
विश्रमितश्रमशीकरे ॥
निजगाद ... नन्दने ॥ ध्रुवम् ॥ ५

[1]मम रुचिरे चिकुरे कुरु मानद!
[2]मनसिजध्वजचामरे ।
रतिगलिते ललिते कुसुमानि
शिखण्डिशिखण्डकडामरे ॥
निजगाद ... नन्दने ॥ ध्रुवम् ॥ ६

सरसघने जघने मम
शम्बरदारणवारणकन्दरे ।
मणिरशनावसनाभरणानि
शुभाशय! वासय सुन्दरे ॥
निजगाद ... नन्दने ॥ ध्रुवम् ॥ ७

1. घनरुचिरे. 2. मानसज.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेव[1]वचसि रुचिरे
हृदयं सदयं कुरु मण्डने ।
हरिचरणस्मरणामृतनिर्मित
कलिकलुषज्वरखण्डने ॥
निजगाद ... नन्दने ॥ ध्रुवम् ॥ ८

श्लो ॥ रचय कुचयोश्चित्रं
पत्रं कुरुष्व कपोलयो-
र्घटय जघने काञ्चीं-
मञ्चस्रजं कबरीभरे ।
कलय वलयश्रेणीं
पाणौ पदे मणिनूपुरा-
विति निगदितः प्रीतः
पीताम्बरोऽपि तथाकरोत् ॥ ८९

1. रुचिरवचने.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ यद्गान्धर्वकलासु कौशल-
मनुध्यानं च यद्वैष्णवं
यच्छृङ्गारविवेक[1]तत्त्व-
रचनाकाव्येषु लीलायितम् ।
तत्सर्वं जयदेवपण्डित-
कवेः कृष्णैकतानात्मनः
[2]सानन्दाः परिशोधयन्तु
सुधियः श्रीगीतगोविन्दतः ॥ ९०

श्लो ॥ श्रीभोजदेवप्रभवस्य [3]रामा
देवीसुतश्रीजयदेवकस्य ।
पराशरादिप्रियवर्गकण्ठे
श्रीगीतगोविन्दकवित्वमस्तु ॥ ९१

1. तत्त्वमपि यत्काव्येषु. 2. स्वच्छन्दं. 3. राधादेवी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लो ॥ साध्वी! माध्वीक! चिन्ता [1]न भवति
भवतः शर्करे! कर्कशाऽसि
द्राक्षे! द्रक्ष्यन्ति के त्वाममृत!
मृतमसि क्षीर! नीरं रसस्ते।
माकन्द! क्रन्द कान्ताधर! [2]धर
न तुलां गच्छ यच्छन्ति भावं
यावच्छृङ्गार[3]सारं शुभ-
मिव जय[4]देवस्य वैदग्ध्यवाचः ॥ ९२

श्लो ॥ इत्थं केलितर्तीर्विहृत्य
यमुनाकूले समं राधया
तद्रोमावलिमौक्तिकावलि
युगे वेणीभ्रमं बिभ्रति।

---

1. न भवतु भवती शर्करे. 2. धरणितलं गच्छ.
3. सारस्वतमिह जय. 4. देवस्य विष्वग्वचांसि.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्राह्लादिकुचप्रयाग-
फलयोर्लिप्सावतोर्हस्तयो-
र्व्यापाराः पुरुषोत्तमस्य
ददतु स्फीतां मुदां सम्पदम् ॥ ९३

इति श्रीजयदेवकृतौ गीतगोविन्दे सुप्रीतपीताम्बरो
नाम द्वादशः सर्गः

Printed at the Vavilla Press, Madras—21.—1956.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ क्रय्यसंस्कृतपुस्तकानि ॥

वैदिकग्रन्थाः

		रू.	अ.
पञ्चसूक्तानि	...	०	३
रुद्रनमकचमकम्—सस्वरम्	...	०	३
सन्ध्यावन्दनम् (याजुषम्)	...	०	३
दर्शतर्पणम्	...	०	२
पञ्चायतनपूजा	...	०	३
तैत्तिरीयोपनिषत्— ब्रह्ममेधसहिता सस्वरा	...	१	४
त्रिकाण्डसारार्थबोधिनी—(श्रीविद्यामन्त्रभाष्यात्मिका)		१	८

निघण्टुग्रन्थाः

अमरकोशः—(मूलमात्रम्)	...	१	०
संस्कृतान्ध्रनिघण्टुः	...	५	०
संस्कृतद्राविडनिघण्टुः	...	(मुद्रणे)	

वेदान्तग्रन्थाः

श्रीमद्भगवद्गीता—(मूलमात्रम्)	...	०	८
श्रीमद्भगवद्गीता With English Translation by A. M. Sastri	...	८	०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

		रू.	अ.
श्रीमद्भगवद्गीता—संस्कृतद्रविडश्लोकैः द्रविड-तात्पर्येण च सहिता	...	२	८
ब्रह्मसूत्राणि—(मूलम्)	...	०	४
उपनिषत्सु (Minor Upanishads Vol. I)	...	२	०
दक्षिणामूर्तिस्तोत्रम्—दक्षिणामूर्त्युपनिषदादयः (Minor Upanishads Vol. II)	...	४	०
विवेकचूडामणिः	...	०	८

तर्क, व्याकरणग्रन्थाः

तर्कसङ्ग्रहः न्यायबोधिनी—निरुक्ति-पदकृत्यसहितः		२	०
शब्दमञ्जरी—(दृढपलात्मिका)	...	०	१२
तिङन्तमञ्जरी—धातुपाठसहिता	...	०	४
लघुसिद्धान्तकौमुदी	...	१	०
वासवदत्ता कथासङ्ग्रहः	...	०	१२

काव्यग्रन्थाः

शिशुपालवधः—८ सर्गपर्यन्तः	...	१	८
सुभाषितनीवी—व्याख्यानसहिता	...	(मुद्रणे)	
कुमारसम्भवः—आङ्गलार्थानुवादसहितः १,२,३,४,५,६ सर्गपर्यन्तः	...	४	०
भर्तृहरिकृत नीति, शृङ्गार, वैराग्य शतकत्रयं आङ्गलानुवादसहितम्	...	६	०
भर्तृहरिविरचितनीतिशतकम्—आङ्गलानुवादसहितम्	...	२	०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

		रू.	अ
भर्तृहरिशतकत्रयम्—मूलम्	...	०	८
सुभाषितत्रिशती—भर्तृहरि प्रणीता रामचन्द्रविरचित-व्याख्यानसहिता	...	२	८
किरातार्जुनीयम्—सव्याख्यानम्	...	२	८
कुमारसम्भवः सव्याख्यः (१-८ सर्गाः)	...	१	१२
रामकर्णामृतम्	...	१	०
यादवाभ्युदयः-अप्पय्यदीक्षितीयव्याख्यान-सहितः ४ सर्गपर्यन्तः आङ्गलानुवाद-तत्प्रतिपदार्थसहितः	...	२	८
श्रीकृष्णकर्णामृतम्—मूलम्	...	०	१२
,, आङ्गलानुवादसहितम्	...	२	८
हंससन्देशः सव्याख्यः	...	०	६
हंससन्देशः-सव्याख्यः प्रतिपदाङ्गलार्थानुवादाभ्यां सहितः (एतद्व्याख्या चेन्नपुरीय पच्चयप्प-कलाशालायां संस्कृतपण्डितेन श्वेतारण्यं नारायणशास्त्रिणा विरचिता)	...	१	८
मार्तण्डोदयम्—शेषशास्त्रि विरचितम्	...	०	१२
श्रीकृष्णलीलातरङ्गिणी	...	१	८
मेघदूतः—मल्लिनाथ व्याख्या सहितः	...	१	०
मेघसन्देशः—मल्लिनाथीय व्याख्यासमेतः, सम्पूर्णपीठिकाङ्गलार्थ विन्यासैः सहितः	...	३	०
रघुवंशः मल्लिनाथ व्याख्यासमेतः	...	४	८
रघुवंशः-(11-12-13 सर्गाः) आङ्गल प्रतिपदार्था-ङ्गलानुवादात्मकः	...	४	८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चम्पू, गद्यग्रन्थाः

		रू.	अ.
चम्पूरामायणम्—सव्याख्यानम्	...	३	८
भोजचरितम्	...	१	८
दशकुमारचरितम्—दण्डिविरचितं सव्याख्यानम्		२	८
दशकुमारचरितम्—पूर्वपीठिका with Notes & Translation		२	८
दशकुमारचरितम्—उत्तरपीठिका with Notes & Translation	...	२	८
दशकुमारचरितम्—with Introduction Translation and Notes in English by Satagopan Pandit V. Anantacharya M. A and M. Baktavatsalam M. A. B. O. L.	...	६	८
हर्षचरितम्—तृतीयोच्छ्वासमात्रम् with notes & Translation	...	१	८
भाषामञ्जरी (प्रश्नोत्तरे)	...	०	८
हितोपदेशः	...	१	१२
मन्दारवती (कपिस्थलं कृष्णमाचार्यविरचिता बृहत्कथामञ्जर्युद्धृताभिनवकथा)	...	०	१२
मन्दारवती (कपिस्थलं कृष्णमाचार्यविरचिता बृहत्कथामञ्जर्युद्धृताभिनवकथा)	...	०	१२
षेक्स्पियर् नाटककथावली	...	२	८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

		रू.	अ.
संस्कृतबालशिक्षा—			
,, द्राविडप्रतिपदार्थसहिता	...	०	५
,, आङ्गलप्रतिपदार्थसहिता	...	०	५
,, आन्ध्रप्रतिपदार्थसहिता	...	०	६
,, हिंदीबालबोधः	...	०	५

अलङ्कारग्रन्थाः

काव्यादर्शः-दण्डिविरचितः सव्याख्यः साङ्गलानुवादश्च		५	०
चन्द्रालोकः—सव्याख्यः	...	१	०

नाटकग्रन्थाः

डमरुकम्	...	०	८
अभिज्ञानशाकुन्तलनाटकम् शतावधानम्-श्रीनिवासाचार्यविरचितया सभूमिकया व्याख्यया सहितम्	...	५	०
अभिज्ञानशाकुन्तलम् आङ्गलानुवादसहितम् संस्कृतपदानुवादपूर्वाङ्गलटिप्पण्या च समेतम्	...	६	८
वेणीसंहारः व्याख्याद्वयोपेतः	...	२	८
महाकविबोधायनकृत भगवदज्जुकनाटकम्—पीठिकासहितम्	...	०	६

वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्

पोस्ट् बाक्स् १३५२, चेन्नपुरी. १.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ [illegible]

लक्ष्मीसहस्रनामस्तोत्रम् ...
सुब्रह्मण्यसहस्रनामस्तोत्रम् ...
विष्णुसहस्रनामस्तोत्रम् ...
वटुकभैरवसहस्रनामस्तोत्रम् ...
श्रीलक्ष्मीनृसिंहसहस्रनामस्तोत्रम् ...
वेङ्कटेशसहस्रनामस्तोत्रम् ...
भवानीसहस्रनामस्तोत्रम् ...
अन्नपूर्णासहस्रनामस्तोत्रम् ...
कालिकासहस्रनामस्तोत्रम् ...
गणपतिसहस्रनामस्तोत्रम् ...
श्रीगोपालसहस्रनामस्तोत्रम् ...
श्रीसीतासहस्रनामस्तोत्रम् ...
गायत्रीसहस्रनामस्तोत्रम् ...
शिवसहस्रनामस्तोत्रम् ...
बालासहस्रनामस्तोत्रम् ...
आञ्जनेयसहस्रनामस्तोत्रम् ...
रामसहस्रनामस्तोत्रम् ...
कृष्णसहस्रनामस्तोत्रम् ...
ललितासहस्रनामस्तोत्रम् ...
श्रीनरेशसह…

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi